








# चतुर्थः घट्टः

## आजीविकाः

अष्टमः अध्यायः

# ग्रामीणक्षेत्रे आजीविकाः

प्रथमे पाठे अस्माभिः स्वजीवने विद्यमानानाम् अनेकासां विविधतानाम् उपरि दृष्टिपातः कृतः। अस्माभिः एतस्मिन् विषये अपि विचारितं यत् विभिन्नेषु क्षेत्रेषु वासकारणात् तत्रत्यानां जनानां कार्येषु व्यवसायेषु च कथं प्रभावः जायते । तत्र विद्यमानाः पादपाः तत्रत्यानि सस्यानि अन्यानि वस्तूनि च कथं तेषां कृते महत्त्वपूर्णानि भवन्ति। अस्मिन् पाठे वयं इदं द्रक्ष्यामः यत् ग्रामे जनाः कैः विभिन्नैः उपायैः स्वाजीविकाः चालयन्ति। गतद्वयोः पाठयोः इव अत्रापि वयम् एतस्य निरीक्षणं करिष्यामः यत् किं जनानां पार्श्वे आजीविकायाः चालनस्य समानाः अवसराः उपलब्धाः सन्ति अथवा न सन्ति। तेषां जीवनस्य परिस्थितयः परस्परं कियतीं साम्यतां भजन्ते अपि च ते कासां समस्यानां सम्मुखीकरणं कुर्वन्ति एतस्मिन् विषये अपि वयं ज्ञास्यामः ।



- उपरिप्रदत्तचित्रेषु जनाः यत् कार्यं कुर्वन्तः दृश्यन्ते, तस्य कार्यस्य वर्णनं कुर्वन्तु।
- कृषिसम्बद्धकार्याणि पृथक् कुर्वन्तु अपि च यानि कार्याणि कृषिसम्बद्धानि सन्ति तेषां पृथक् सूचीं कुर्वन्तु।
- भवद्भिः ग्रामीणक्षेत्रेषु जनाः अनेकविधानि कार्याणि कुर्वन्तः दृष्टाः। तेषु केषाञ्चित् जनानां चित्रं निर्माय तेषां विषये लिखन्तु।

**कलपट्टु-ग्रामः**

तमिल-नाडु-प्रान्ते समुद्रतटस्य समीपे कश्चित् ग्रामः अस्ति कलपट्टुः । अत्र जनाः बहुविधानि कार्याणि कुर्वन्ति । अपरेषां ग्रामाणाम् इव अत्र अपि कृषिम् अतिरिच्य अन्यानि बहूनि कार्याणि भवन्ति यथा कण्डोल-पात्र- -घट-इष्टिका-शकटादीनां निर्माणम् । कलपट्टुग्रामे केचन जनाः परिचारिका-शिक्षक-रजक-तन्तुवाय-नापित-द्विचक्रिकायान्त्रिकादि-रूपेण स्वसेवाः यच्छन्ति । अत्र केचन आपणिकाः व्यापारिणः च अपि सन्ति । या मुख्यवीथिः अस्ति सा विपणिवत् दृश्यते । तत्र भवन्तः विभिन्नान् लघ्वापणान् द्रक्ष्यन्ति यथा चाय-शाक-वस्त्रापणाः अपि च आपणद्वयं बीजोर्वरकयो अस्ति । आपणचतुष्टयं चायस्य अर्थात् उष्णपेयस्य सन्ति यत्र च “टिफिन’ अर्थात् पाथेयपात्र-भोजनम् अपि लभ्यते । अत्र पाथेयपात्रस्य अभिप्रायः अस्ति खाद्यस्य वस्तूनि यथा प्रातः इडली-दोसः उपमा वा लभ्यते अपि च सांयकालस्य खाद्ये बडा-बौंडा-मैसूरपाकाः लभन्ते । चायापणस्य समीपे एकस्मिन् कोणे कस्यचित् लौहकारस्य परिवारः निवसति । तस्य गृहे एव लौहस्य वस्तूनां निर्माणकार्यं कार्यं भवति । पार्श्वे एव समीकरणस्य कश्चित् आपणः अस्ति । तत्र द्विचक्रिका भाटकेन अपि लभ्यते । ग्रामे रजकस्य परिवारद्वयं वस्त्रप्रक्षालनस्य कार्यं कृत्वा स्वाजीविकाः चालयति । केचन जनाः पार्श्वस्थं नगरं गत्वा गृहनिर्माणस्य यात्रिवाहन-चालनस्य च कार्यं कुर्वन्ति ।

ग्रामः लघ्वीभिः उपत्यकाभिः आवृत्तः अस्ति । सिंचितभूमौ मुख्यतः धान्यस्य कृषिः भवति । अधिकाः परिवाराः कृषिकर्मणा स्व-आजीविकाः अर्जयन्ति । अत्र आम्रस्य नारिकेलस्य च बहवः वृक्षाः सन्ति । कार्पास-इक्षु-कदलीसस्यानि प्ररोह्यन्ते । आगच्छन्तु कैश्चित् जनैः सह मिलामः ये कलपट्टोः क्षेत्रेषु कार्यं कुर्वन्ति अपि च पश्यामः यत् वयं तेषाम् आजीविकायाः विषये किं शिक्षितुं शक्नुमः ।



*धान्यस्य रोपणं श्रमसाध्यं कार्यं भवति ।*

**तुलसी**

*वयं सर्वे अत्र रामलिङ्गमस्य भूमौ कार्यं कुर्मः । तस्य परिवारस्य पार्श्वे कलपट्टुग्रामे विंशतिः एकडपरिमितं धान्यस्य क्षेत्राणि सन्ति । विवाहात् पूर्वम् अपि अहं स्वमातुः गृहे धान्यस्य क्षेत्रेषु एव श्रमं करोमि स्म । अत्र अहं प्रातः ८.३०तः सायं सार्धचतुर्वादनं यावत् कार्यं करोमि । रामलिङ्गमस्य पत्नी करुथम्मा कार्यस्य निरीक्षणं करोति ।*

वर्षे केचन एव अवसराः भवन्ति यदा अहं नियमित-रूपेण पारिश्रमिकं प्राप्नोमि । अयम् अवसरः तेषु अवसरेषु कश्चन अस्ति । अहं धानस्य रोपणं करोमि । यदा धान्यस्य सस्यं किञ्चित् वर्धिष्यते तर्हि रामलिंगमः अस्मान् सस्यानाम् अवाञ्छित-तृण-चयनाय (निराई) अपि च पश्चात् सस्य-कर्तनाय आह्वास्यति ।

यदा अहम् अल्पवया आसम् तदा कृषेः कार्यं सरलतया करोमि स्म । परन्तु अधुना यथा यथा वयः वर्धते अहं नमनं कृत्वा कार्यकरणेनअपि च चिरकालं यावत् जले पादयोः निमज्जनेन कष्टम् अनुभवामि । रामलिंगमः एकस्य दिनस्य ४०रुप्यकाणि पारिश्रमिकं ददाति । मम ग्रामस्य पारिश्रमिकस्य अपेक्षया एतद् किञ्चित् न्यूनम् अस्ति । पुनरपि अहं श्रमार्थम् अत्र आगच्छामि । रामलिंगमे अहं विश्वसिमि यत् कार्ये आपतिते सति सः माम् एव आह्वास्यति । अन्येषां जनानाम् इव सः अल्प-पारिश्रम-श्रमिकान् समीपस्थेषु ग्रामेषु न अन्वेष्यति ।

मम पतिः रमनः अपि कश्चित् श्रमिकः अस्ति । अस्माकं पार्श्वे काचिदपि भूमिः नास्ति । वर्षस्य एतेषु मासेषु सः क्षेत्रेषु कीटानाम् उपरि औषध-प्रोक्षणं करोति । यदा क्षेत्रेषु किमपि कार्यं न लभते तदा सः पार्श्वस्थे आकरे पाषाणवहनस्य अथवा नदीतः सैकतवहनस्य कार्यं प्राप्नोति । एते पाषाणाः सैकतानि च पार्श्वस्थेषु नगरेषु गृहनिर्माणाय भारवाहकयानेन नीयन्ते । क्षेत्रे कृषिकार्यम् अतिरिच्य अहं गृहस्य सम्पूर्णं कार्यं करोमि । अहं गृहे सर्वेषां कृते भोजनं पचामि वस्त्राणि प्रक्षालयामि अपि च स्वच्छतां करोमि । अन्याभिः महिलाभिः सह गत्वा वनात् काष्ठानि अपि आनयामि । ग्रामात् प्रायः ११किलोमीटरदूरे (कूपः) बोरवेल इति अस्ति यतः




किं तुलस्यै आवर्षं धनार्जनस्य अवसराः लभन्ते? उपरि प्रदत-चित्रस्य आधारेण ज्ञापयन्तु

जलम् आनीय आगच्छामि । मम पतिः गृहवस्तूनां यथा शाकादीनां क्रयणे मम साहाय्यं करोति ।

अस्माकं द्वे पुत्र्यौ एव अस्माकं जीवनस्य प्रसन्नतारूपे स्तः । द्वे एव विद्यालयं गच्छतः । गतवर्षे एका रुग्णा जाता आसीत् तर्हि सा नगरीय-चिकित्सालयं नीता । अस्माभिः तस्य उपचारार्थं राम लिङ्गात् रूप्यकाणि ऋणरूपेण स्वीकृतानि आसन् तथा च तस्य ऋणस्य नैष्कृत्यर्थम् वयं स्वगां विक्रेतुं बाध्याः जाताः ।

यथा भवद्भिः तुल्स्याः कथायां पठितं ग्रामीणक्षेत्रेषु निर्धनपरिवाराणां सम्पूर्णः कालः जलस्य काष्ठानां पशुचारणस्य च आनयने गच्छति । एतैः कार्यैः कश्चित् धनलाभः न भवति,परन्तु निर्धनपरिवारेषु एतानि कार्याणि बहुमहत्त्व-पूर्णानि भवन्ति । ते श्रमेण अल्पं धनम् अर्जयन्ति तेन निर्वाहः न भवति । गृहव्यवस्थायै तथा च जीवितुं एतानि कार्याणि करणीयानि भवन्ति ।

1. तु लस्याः कार्यस्य विवरणं यच्छन्तु । इदं रमणस्य कार्यात् कथं पृथक् अस्ति ?
2. तुलसी स्वकार्यस्य न्यूनं पारिश्रमिकं प्राप्नोति। भवतां चिन्तनस्य अनुसारं क्षेत्रेषु ये श्रमिकाः कार्यं कुर्वन्ति ते न्यूने पारिश्रमिके कार्यं कर्तुं कथं बाध्याः सन्ति ?
3. भवतां क्षेत्रे अथवा समीपस्थेषु ग्रामेषु कानि कानि सस्यानि प्ररोह्यन्ते ? तत्र कृषकश्रमिकाः कीदृशं कार्यं कुर्वन्ति ?
4. यदि तुलस्याः पार्श्वे कृषियोग्यभूमिः स्यात् तर्हि तस्य अर्जनस्य अथवा आजीविकायाः उपायाः कथं पृथक् अभविष्यत् ? चर्चां कुर्वन्तु ।

अस्माकं देशे ग्रामीण-परिवारेषु प्रायः ४० प्रतिशतं सस्यकर्तनकाले अन्येषां लघुकृषकाणां सन्ति । केषाञ्चित् पार्श्वे भूखण्डाः सन्ति अन्ये तुलसीवत् भूमिहीनाः सन्ति । कदाचित् यदा ते आवर्षं कार्यं न प्राप्नुवन्ति तदा बाध्यतावशात् तैः कार्यान्वेषणाय सुदूरक्षेत्राणि गन्तव्यानि भवन्ति । एतादृशं पलायनं केषुचित् विशिष्ट-वातावरणेषु एव भवति ।



**शेखरः**

अस्माभिः एतत् धान्यं स्वगृहं नेतव्यम् अस्ति । मम परिवारेण अधुना एव सस्यकर्तनं समाप्तम् । अस्माकं पार्श्वे केवलम् एकड-द्वय-परिमिता भूमिः अस्ति। वयं स्वक्षेत्रस्य सम्पूर्णं कार्यं स्वयमेव कुर्मः । अहं सस्यकर्तनकाले अन्येषां लघुकृषकाणां साहाय्यं स्वीकरोमि अपि च विनिमये तेषां क्षेत्रे सस्यकर्तनकार्यं कारयामि।

व्यापारी मह्यम् ऋणरूपेण बीजानि उर्वरकं च यच्छति। तं ऋणं प्रत्यावर्तितुं मया अल्पमूल्येन तत् धान्यं विक्रेतव्यं भवति । यदि अहं तत् धान्यं विपण्यां विक्रीणीयां तर्हि अधिकं धनम् अर्जयितुं शक्नुयाम्। परन्तु मया ऋणस्य प्रत्यावर्तनम् अपि करणीयम्। व्यापारी कृषकान् स्मारयितुं स्वप्रतिनिधिं प्रेषितवान् अस्ति यत् ये कृषकाः तस्मात् ऋणं स्वीकृतवन्तः ते तम् एव व्यापारिणं धान्यं विक्रीणीरन्। अहं स्वक्षेत्रात् ६० गोणीधान्यं प्राप्स्यामि । अर्धेन अहं गृहीतं ऋणं प्रत्यावर्तिष्ये अपि च अवशिष्टं गृहस्य उपयोगाय भविष्यति भविष्यति। परन्तु मम भागभूतं यत् धान्यं भवति तत् केवलम् अष्टौ मासान् यावत् एव भोक्तुं भवति अतः मया अधिकं धनम् अर्जनीयं भवति। एतस्मात् कारणात् अहं

रामलिङ्गमस्य तण्डुलोद्योगे कार्यं करोमि। तत्र अहं पार्श्वस्थेभ्यः कृषकेभ्यः धान्यसंग्रहणाय तस्य साहाय्यं करोमि । अस्माकं पार्श्वे काचित् सङ्करप्रजात्याः धेनुः अपि अस्ति तस्याः दुग्धं वयं समीपस्थ-सहकारि-समितिं विक्रीणीमहे। एतस्मात् दैनन्दिन-व्ययस्य कृते किञ्चित् धनं लभ्यते।

**ऋणे स्वीकृते सति**

यथा भवद्भिः उपरि पठितं कदाचित् शेखरसदृशाः कृषकाः आवश्यकानि वस्तूनि क्रेतुं ऋणरूपेण धनं स्वीकुर्वन्ति । प्रायः एतत् धनं बीज-कृमिनाशक-उर्वरकान् क्रेतुं धनपतेः ऋणरूपेण स्वीक्रियते।

---

- शेखरस्य परिवारः किं कार्यं करोति? भवतां विचारेण शेखरः अन्यश्रमिकान् स्वक्षेत्रीये कार्ये किमर्थं न नियोजयति ?
- शेखरः नगरीय-विपण्यां स्वधान्यं किमर्थं न विक्रेतुं पारयति ?
- शेखरस्य भगिनी मीना अपि व्यापारितः ऋणं स्वीकृतवती आसीत् परन्तु सा स्वधान्यं तं न विक्रेतुम् इच्छति । सा व्यापारिणः प्रतिनिधिम् उक्तवती यत् तस्य धनं प्रत्यर्पयिष्यति । मीनायाः व्यापारिप्रतिनिधेः च मध्ये एतम् विषयम् अधिकृत्य का वार्ता जाता स्यात् ? द्वयोः तर्कयोः लेखनं कुर्वन्तु।
- तुलसी-शेखरयोः जीवने काः समानताः सन्ति तथा च काः भिन्नताः सन्ति ? भवताम्

तुलसी-शेखरयोः विवरणं पुनः पठन्तु। ते उन्नतकृषकस्य रामलिङ्गमस्य विषये किं कथयन्ति ? अनेन सहैव भवद्भिः यत् रामलिङ्गमस्य विषये पठितम्, तत् मनसि निधाय निम्नलिखितप्रश्नानाम् उत्तराणि यच्छन्तु-

- तस्य पार्श्वे कियती भूमिः अस्ति ?
- स्वभूमौ उत्पन्न-धान्येन सः किं करोति ?
- कृषिम् अतिरिच्य तस्य अर्जनस्य अन्यानि कानि कानि साधनानि सन्ति ?

उत्तरस्य निम्नलिखिताधाराः भवितुं शक्नुवन्ति- तयोः पार्श्वे कियती भूमिः अस्ति तैः ऋणं किमर्थं स्वीकरणीयं भवति, तयोः अर्जनस्य साधनानि



*रामलिंगमस्य २०एकडपरिमिते भागे आरोपितं धान्यस्य सस्यम्- तुलस्याः अन्येषां च कृषकाणां कठिनश्रमस्य परिणामः अस्ति।*

कानि कानि सन्ति अपि च अन्येषां भूमौ कार्यकरणस्य आवश्यकता तेषां कृते किमर्थम् अस्ति।

---

यदि बीजानि उत्तमानि न भवन्ति अथवा सस्यानि कीटाक्रान्तानि स्युः तर्हि सम्पूर्णं सस्यं नष्टीभवितुं अर्हति। वृष्टेः अभावात् सस्यं नष्टीभवितुं अर्हति । एतादृश्यां स्थितौ कृषकाः गृहीतर्णं न प्रत्यावर्तयितुं पारयन्ति । बहुधा तैः परिवारस्य भरणाय पोषणाय च इतोऽपि धनम् ऋणरूपेण स्वीकरणीयं भवति।

शीघ्रमेव ऋणम् एतावत् वर्धते कृषकः कियदपि अर्जयेत् सः तत् ऋणं न प्रत्यावर्तितुं पारयति । एतादृश्यां स्थितौ उच्यते यत् कृषकः ऋणभारेण भूमिसात् जातः। गतेषु केषुचित् वर्षेषु इदं कृषकाणां विपत्तेः मूलकारणम् अभवत् । केषुचित् क्षेत्रेषु कृषकाः ऋण-कष्ट-कारणात् आत्महत्यां कृतवन्तः।

**रामलिङ्गमः करुथम्मा च**

भूमिम् अतिरिच्य रामलिंगमस्य परिवारस्य पार्श्वे कश्चन तण्डुलोद्योगः अस्ति बीजोर्वरकयोः अपि कार्यम् आसीत्। ते कलपट्टोः पार्श्वस्थेभ्यः ग्रामेभ्यः एव धान्यं क्रीणन्ति। उद्योगस्य तण्डुलाः पार्श्वस्थ-व्यापारिभ्यः विक्रीयन्ते एतस्मात् तेषाम् अर्जनं सम्यक् भवति।

**भारतस्य कृषक-श्रमिकाः कृषकाः च**

कलपट्टुग्रामे तुलस्याः तुल्याः एव अन्ये अपि कृषिकार्ये संलग्नाः श्रमिकाः सन्ति अपि च रामलिंगमसदृशाः महान्तः कृषकाः सन्ति। भारते प्रत्येकं ग्रामीण-परिवारेषु प्रायः परिवारद्वयं कृषिकार्ये संलग्नानां श्रमिकाणाम् अस्ति । एतादृशाः सर्वे परिवाराः स्व-अर्जनार्थम् अन्येषाम् क्षेत्राणाम् उपरि आश्रिताः भवन्ति। एतेषु केचन भूमिहीनाः सन्ति अपि च केषाञ्चित् पार्श्वे भूमेः लघुखण्डाः सन्ति।

शेखरसदृशानां कृषकाणां विषये चिन्तयामः तर्हि तेषाम् आवश्यकतायाः अनुगुणं क्षेत्राणि बहु-न्यूनानि सन्ति । भारतस्य ८०प्रतिशतं कृषकाणां



**नागालैंडस्य सोपानाकाराकृषिः**

अयं कश्चित् ग्रामः अस्ति यस्य नाम चिजामी अस्ति। अयं नागालैंडप्रदेशस्य फेकजनपदे अस्ति । अस्य ग्रामस्य ग्रामवासिनः चखेसंग-समुदायस्य सन्ति। ते सोपानाकारां कृषिं कुर्वन्ति। एतस्य अभिप्रायः अस्ति यत् उपत्यकायाः नतभूमिः लघुषु लघुषु समतल-भागेषु विभज्यते अपि च सा भूमिः सोपानाकारा क्रियते। प्रत्येकं समतल-भूखण्डस्य प्रान्तभागः उपरि उत्थाप्यते यतः जलं तत्र पूरितं स्यात् इदं तण्डुलकृषेः कृते सर्वोत्तमम् अस्ति।

चिजामी-जनानां पार्श्वे स्वस्य स्वस्य क्षेत्राणि सन्ति परन्तु ते सम्भूय परस्परं क्षेत्रेषु व्यतिकुर्वन्ति। ते षड् अष्टौ वा जनानां समूहं रचयित्वा सम्भूय च पर्वतस्य एकस्मिन् भागे अनावश्यक-तृणानि अपसारयन्ति । यदा दैनन्दिनं कार्यं समाप्तं भवति तदा समूहः सम्भूय भोजनं करोति। इत्थं बहूनि दिनानि यावत् चलति यावत्पर्यन्तं कार्यस्य समाप्तिः न भवति।



स्थितिः एतादृशी एव अस्ति। भारते केवलं २०प्रतिशतं कृषकाः रामलिङ्गम-सदृशानां महतां कृषकाणां श्रेण्यां गण्यन्ते। एतादृशाः कृषकाः ग्रामस्य भूमौ कार्यं कुर्वन्ति तेषाम् उत्पादनस्य अधिकः भागः विपण्यां विक्रीयते। बहुभिः उन्नतकृषकैः अन्यानि कार्याणि अपि प्रारब्धानि सन्ति यथा आपणिक-कार्यम्, व्याजस्य उपरि धनदानं लघूद्योगानां सञ्चालनादिकं च।

---

उपरि प्रदत्ताङ्कान् दृष्ट्वा किं भवन्तः वक्तुं शक्नुवन्ति यत् भारतस्य अधिकतराः कृषकाः निर्धनाः सन्ति? भवतां दृष्ट्या एतां स्थितिं परिवर्तितुं किं कर्तुं शक्यते?

---

अस्माभिः कलपट्टुग्रामे यत् कृषिकार्यं भवति तस्मिन् विषये पठितम्। ग्रामीणक्षेत्रेषु कृष्या सार्धं जनाः वनोत्पादानां पशूनाम् उपरि च आश्रिताः भवन्ति। उदाहरणार्थं मध्यभारतस्य केषुचित् ग्रामेषु कृषेः वनस्य उत्पादानाम् उपरि च आश्रिताः भवन्ति। द्वयमेव आजीविकायाः साधनम् अस्ति। मधुद्रुमस्य चयनं तेंदूवृक्षस्य पत्राणाम् एकत्रीकरणं मधुनः निष्पीडनं च आयस्य अतिरिक्तसाधनानि सन्ति। अनेन एव प्रकारेण सहकारिसमितये अथवा पार्श्वस्थ-नागरिकेभ्यः दुग्धविक्रयणम् अपि बहूनां जनानां कृते आयस्य मुख्यसाधनम् अस्ति।
समुद्र-तटीय-क्षेत्रेषु वयं पश्यामः यत् अशेषाः ग्रामाः मत्स्यग्रहणस्य कार्ये संलग्नाः सन्ति।आगच्छन्तु अरुणा-पारिवेलनयोः जीवनविषये पठित्वा मत्स्य-ग्राहिणः कस्यचित् परिवारस्य विषये किञ्चित् इतोऽपि जानीयाम। अयं परिवारः कलपट्टुग्रामस्य पार्श्वे पुदुपेटनामके ग्रामे निवसति।

**अरुणा पारिवेलनः च**

पुदुपेटः कलपट्टुतः नातिदूरे वर्तते। अत्र जनाः मत्स्य-ग्रहणेन स्वाजीविकां चालयन्ति। तेषां गृहाणि समुद्रस्य पार्श्वे भवन्ति अपि च तत्र परितः जलस्य कैटामरैनस्य (मत्स्यपालकानां विशिष्टप्रकारकस्य नौः) च पङ्क्तयः दृश्यन्ते। प्रातः काले सप्तवादने समुद्रतटे बहुव्यस्तता दृश्यते। एतस्मिन् काले सर्वे धीवराः मत्स्यान् गृहीत्वा प्रत्यागच्छन्ति। मत्स्यान् क्रेतुं विक्रेतुं च बह्व्यः महिलाः समवेताः भवन्ति।

मम पतिः पारिवेलनः मम भ्राता अपि च मम आवुत्तः अद्य बहु बिलम्बेन प्रत्यागतवन्तः। अहं बहु उद्विग्ना आसम्। एते अस्माकं कैटामरैन इत्यस्मिन् सम्भूय एव समुद्रं गच्छन्ति ते ज्ञापितवन्तः यत् ते अद्य सामुद्रिक-झञ्झावाते बद्धाः जाताः।

अद्य ये मत्स्याः गृहीताः तेभ्यः परिवारस्य उपयोगाय केचन मत्स्याः मया चित्वा एकस्मिन् पक्षे स्थापिताः। अन्यान् अहं विक्रेष्ये। अनेन विक्रयणेन यद् धनं लप्स्यते तत् चर्तुषु भागेषु विभज्यते।



स्थानीयापणे मत्स्यान् विक्रीणन्त्यः धीवर्यः

भागत्रयं तेषु त्रिषु जनेषु विभज्यते ये मत्स्यग्रहणार्थं गच्छन्ति अवशिष्टः भागः तस्मै दीयते यस्य नौ-जालादिकं च भवति यतो हि जालं कैटामरैनः तस्य उर्जकः इंजन इति च अस्माकम् एव अस्ति तर्हि सः भागः अपि अस्मदीयः एव भविष्यति। अस्माभिः वित्तकोशतः ऋणं स्वीकृत्य उर्जकः क्रीतः अस्ति यः कैटरामरैने योजितः अस्ति। अनेन एते जनाः समुद्रे

- अरुणा-शेखरयोः परिवारः ऋणं स्वीकर्तुं किमर्थं बाध्यः अस्ति ? भवन्तः तयोर्मध्ये कां समानतां कां च पृथक्तां पश्यन्ति।
- किं भवन्तः सुनामीविषये श्रुतवन्तः ? इयं का भवति? अनया अरुणासदृशाः परिवाराः कां हानिं प्राप्तवन्तः स्युः ?

दूरं यावत् गन्तुं शक्नुवन्ति अपि च अधिक्येन मत्स्यान् प्राप्तुं शक्नुवन्ति।

लीलामय-विक्रयेण याः महिलाः इतः मत्स्यान् क्रीणन्ति ताः कण्डोलेषु मत्स्यान् पूरित्वा पार्श्वस्थेषु ग्रामेषु विक्रयणार्थं नयन्ति। केचन व्यापारिणः अपि सन्ति ये नगरीयापणानां कृते मत्स्यान् क्रीणन्ति। अहं मध्याह्ने द्वादशवादनं यावत् एव मत्स्यविक्रयणस्य कार्यं समापयामि। सायंकाले मम पतिः अन्ये च सम्बन्धिनः मिलित्वा जालस्य समीकरणं कुर्वन्ति अपि च तस्य परिष्कारं कुर्वन्ति। श्वः प्रातःकाले द्विवादने एव ते समुद्रं प्रति गच्छन्ति। प्रतिवर्षं

वर्षाकाले ते मासचतुष्टयं यावत् समुद्रं न गन्तुं पारयन्ति।

यतोहि एषः मत्स्यानां प्रजननकालः भवति। एषु दिनेषु वयं व्यापारितः ऋणं स्वीकृत्य स्वजीवननिर्वहणं कुर्मः । एतस्मात् कारणात् अस्माभिः बाध्यतावशात् व्यापरिणे मत्स्याः विक्रेतव्याः भवन्ति अपि च वयं मुक्ततया लीलामयं विक्रयणं न कर्तुं पारयामः। ते कार्यरहिताः मासाः काठिन्येन याप्यन्ते । गतवर्षे सुनामीकारणात् अस्माकं महती क्षतिः जाता।

**ग्रामीणक्षेत्रेषु आजीविकायाः साधनानि**

ग्रामीण क्षेत्रेषु जनाः स्व-आजीविकां विभिन्नैः उपायैः चालयन्ति । केचन कृषिकार्यं कुर्वन्ति अपि च केचन अन्यानि कार्याणि कृत्वा स्व-आजीविकां चालयन्ति। क्षेत्रेषु बहुविधानि कार्याणि सम्मिलितानि सन्ति यथा क्षेत्रस्य बीजात् पूर्वं सज्जीकरणम् रोपणं बीजवपनं कर्तनं अनावश्यक-तृणनिःसारणं च। सस्यम् प्रभूतं स्यात् तन्निमित्तं वयं वृष्टेः उपरि आश्रिताः स्मः। अनेन प्रकारेण जीवनम् ऋतुषु एव आश्रितम् अस्ति। बीजवपनस्य कर्तनस्य च काले जनाः बहुव्यस्ताः भवन्ति । अपि च अन्यस्मिन् काले कार्यस्य भारः न्यूनः भवति। देशस्य पृथक्-पृथक्-क्षेत्रेषु ग्रामीणाः जनाः पृथक्-पृथक्सस्यानि प्ररोहन्ति। पुनरपि वयं तेषां जीवनस्य परिस्थितिषु अपि च समस्यासु आधिक्येन समानताः पश्यामः।

जनाः कथं जीवननिर्वहणं कुर्वन्ति अपि च कियत् अर्जयितुं पारयन्ति इदम् एतस्मिन् तथ्ये आश्रितं भवति यत् ये यस्यां भूमौ कृषिं कुर्वन्ति सा कीदृशी अस्ति। केचन जनाः तस्यां भूमौ श्रमिकाणां रूपेण आश्रिताः सन्ति । अधिकाः कृषकाः स्वावश्यकतानां पूर्त्यर्थम् अपि च विपण्यां विक्रेतुम् अपि सस्यानि प्ररोहन्ति।

कैश्चित् कृषकैः स्वसस्यं तेभ्यः व्यापारिभ्यः विक्रेतव्यं भवति येभ्यः ते धनं ऋणरूपेण स्वीकुर्वन्ति । जीवननिर्वहणाय बहुभिः परिवारैः ऋणरूपेण धनं स्वीकरणीयं भवति यदा तेषां पार्श्वे किञ्चित् अपि कार्यं न भवति। ग्रामीणक्षेत्रेषु केचन एतादृशाः परिवाराः सन्ति ये भूमीनां व्यापारस्य अन्यकार्याणां च कारणात् समृद्धाः जायन्ते पुनरपि बहवः जनाः यथा कृषकाः कृषकश्रमिकाः मत्स्यग्राहिणः ग्रामे हस्तशिल्पिनः च आवर्षं वृत्तिं न प्राप्नुवन्ति।

## अभ्यासः

1. भवद्भिः सम्भवतः एतस्मिन् विषये ध्यातं स्यात् यत् कलपट्टुग्रामस्य जनाः कृषिम् अतिरिच्य अन्यानि अपि बहूनि कार्याणि कुर्वन्ति। तेषु पञ्च कार्याणां सूचीं कुर्वन्तु।
2. कलपट्टुग्रामे विभिन्न-समूह-जनाः कृषिकार्ये आश्रिताः सन्ति। तेषां काञ्चित् सूचीं कुर्वन्तु तेषु निर्धनतमः कः अस्ति अपि च किमर्थम् अस्ति ?

3. कल्पयन्तु यत् भवन्तः कस्यचित् मत्स्यग्राहिपरिवारस्य सदस्याः सन्ति। भवतां परिवारः इमां चर्चां करोति यत् उर्जकस्य कृते वित्तकोशतः ऋणं गृह्णीयाम उत न। भवती किं वदिष्यति ?
4. तुलसीसदृशानां निर्धन-ग्रामीण-श्रमिकाणां पार्श्वे प्रायः सुशिक्षा स्वास्थ्यसौविध्यानि अपि च अन्य-साधनानाम् अभावः भवति। भवद्भिः एतस्य पुस्तकस्य प्रथमे अङ्के असमानतायाः विषये पठितम्। तुलसीरामलिङ्गमयोः मध्ये यद् अन्तरम् अस्ति तत् एकविधसमानतायाः रूपम् अस्ति। किं एषा काचित् उचिता स्थितिः अस्ति? भवतां विचारेण एतस्य कृते किं कर्तुं शक्यते? कक्षायां चर्चयन्तु।
5. भवताम् अनुसारं सर्वकारः शेखरसदृशान् कृषकान् कर-व्यवस्थातः मोचयितुं कथं साहाय्यं कर्तुं शक्नोति? चर्चयन्तु।
6. अधः प्रदत्ततालिकां पूरयन् शेखर-रामलिङ्गयोः स्थितीनां तोलनां कुर्वन्तु –

| | शेखरः | रामलिङ्गमः |
|---|---|---|
| कर्षिता भूमिः | | |
| श्रमिकाणम् आवश्यकता | | |
| ऋणस्य आवश्यकता | | |
| सस्यस्य क्रयणम् | | |
| तैः कृतम् अन्यत् कार्यम् | | |

**इति अष्टमोऽध्यायः**